https://universitynews.in/

# M.A. (Final) EXAMINATION, 2018

## SANSKRIT

## Fifth Paper

### ( सर्वेषां वर्गाणां कृते अनिवार्यम् )

### ( शास्त्रीय साहित्यम् आधुनिक काव्यं शिलालेख साहित्यञ्च )

**Time allowed : Three hours** **Maximum marks : 100**

विद्यार्थिभि: सर्वेषां प्रश्नानामुत्तरं यथाशक्य स्वसंस्कृतगिरा देयम्।

1. अधोलिखितस्य महाभाष्यावतरणस्य ससन्दर्भ-व्याख्या कार्या-

(अ) 'सुदेवो असिवरुण' - सत्यदेवोऽसि। 'यस्य ते सप्त सिन्धवा' - सप्त विभक्तय:। 'अनुक्षरन्ति काकुदम्'। काकुदम् - तालु! काकु: - जिह्वा, साऽस्मिन्नुद्यत इति काकुदम् 'सूर्यं सुषिरामिव। तद्यथा - शोभनामूर्मि सुषिरामग्निरन्त: प्रविश्य दहति, एवं ते सप्त सिन्धव:-सप्तविभक्तयस्ताल्वनुक्षरन्ति। तेनासि सत्यदेव:। सत्यदेवा: स्यामेत्यध्येयं व्याकरणम्।

अथवा

दुष्ट: शब्द: स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रु: स्वरतोऽपराधात्। 10

(आ) अथ गौरित्यत्र क: शब्द: ? इति भाष्यकारमतेन विविच्यताम्। 10

अथवा

व्याकरणाध्ययनस्य मुख्यानि प्रयोजनानि प्रदर्शनीयानि। 10

2. निम्नांकित काव्यावतरणस्य संस्कृतव्याख्या विधेया -

(अ) द्विधा चान्वीक्षिकी पूर्वोत्तरपक्षाभ्याम्। अर्हद्भदन्तदर्शने लोकायतं च पूर्व: पक्ष:। साख्यं न्यायवैशेषिकौ चोत्तर:। तइमे षट् तर्का:। तत्र च तिस्र: कथा भवन्ति वादो, जल्पो, वितण्डा च। मध्यस्थयोस्तत्त्वावबोधाय वस्तुतत्त्वपरामर्शीवाद: विजिगीषो: स्वपक्षसिद्धये हलजातिनिग्रहादिपरिग्रहो जल्प:। स्वपक्षस्यापरिग्रहीत्री परपक्षस्य दूषयित्री वितण्डा। 10

अथवा

द्विविधं शिष्यमाचक्षते यदुतबुद्धिमानाहार्य बुद्धिश्च। यस्य निसर्गत: शास्त्रमनुधावति बुद्धि: स बुद्धिमान्। यस्य च शास्त्राभ्यास: सुसंस्कुरुते बुद्धिमसावाहार्यबुद्धि:। त्रिधा च सा स्मृतिर्मति: प्रज्ञेति। अतिक्रान्तस्यार्थस्य स्मर्त्री स्मृति: वर्तमानस्य मन्त्री मति: अनागतस्य प्रज्ञात्री प्रज्ञेति। सा त्रिप्रकाराऽपि कवीनामुपकर्त्री। 10

(आ) काव्यमीमांसाया: तृतीयाध्यायस्य वर्ण्यविषयान् संस्कृतगिरा प्रतिपादयत। 10

अथवा

महाकवि राजशेखरस्य रचनापरिचयो विस्तरेण संस्कृतभाषयां विलिख्यताम्।

3. (अ) अधोलिखितस्य श्लोकस्य ससन्दर्भ व्याख्या विधेया-

अम्भोदेतरवारिबिन्दु विमुखो मान्य: स मे चातको,
वासन्तेतरवासरेषु च तथा वाचंयम: कोकिल:।
गृह्णन् क्षीरमपास्य नीरमरस हंसस्तु वन्द्यो मम,
जीव: श्लाघ्यतम: स एव भुवने यस्मिन् विवेक: पर:।। 10

अथवा

https://universitynews.in/

https://universitynews.in/

त्रातुं नारीजनमिह खलैः पीड्यमानं प्रसह्य,
सम्प्राप्तः किं धृतनरतनुः कोऽप्ययं देव एव।
यत् सच्छीलं विहरति मनोमन्दिरेऽस्य-प्रसन्नं।
सत्सामर्थ्य स्फुरति भुजयोर्नेत्रयोर्दिव्यतेजः।। 10

(आ) नाट्यतत्त्वानुसारेण 'विवेकानन्दविजयम्' अस्य महानाटकस्य समीक्षा कार्या।

**अथवा**

विवेकानन्दविजयं नाटकस्य प्रथमाङ्कस्य कथासारः विलिख्यताम्।

4. अधोलिखितस्य गद्यखण्डस्यानुवादं ससन्दर्भन कुरुत–

(अ) अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते; परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्ह-वैदूर्य-पद्मराग-माणिक्य-मुक्ता-फलादि-जटितानि कपाटानि स्तम्भान्, गृहावग्रहणीः भित्तीः वलभी विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय शतद्वयमितं सुवर्ण श्रृंखलावलम्बिनीं चञ्चच्चाकचक्यचकितीकृताव-लोचक-लोचन-निचयां महाघण्टां प्रसह्य संगृह्य महादेवमूर्तावपि, गदामुदतूतुलत। 10

**अथवा**

इदमाकर्ण्य किंचित्स्मित्वेव परितोऽवलोक्य च योगी जगाद-सत्यं न लक्षितो मया समयवेगः। यौधिष्ठिते समये कलितसमाधिरहं वैक्रम-समये उदस्थाम्। पुनश्च वैक्रमसमये समाधिमाकलय्य अस्मिन्, दुराचार-मये समयेऽहमुत्थितोऽस्मि। अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत् संक्षिप्य कथ्यतां का दशा भारतवर्षस्येति।

(आ) शिवराजविजयस्य रसयोजनायाः समीक्षा कार्या।

**अथवा**

शिवराजविजयस्यप्रथमनिश्वासाधारेण गौरसिंहस्य चारित्रिक वैशिष्ट्यं प्रतिपाद्यताम्।

5. निम्नांकितस्य सप्रसङ्गमनुवादः करणीयः–

(अ) प्रजास्विहाधिष्ठाने पौरजानपदाजनानुग्रहार्थं पार्थिवेन कृत्स्नानामानर्तसुराष्ट्राणाम् पालनार्थं नियुक्तेन पह्लवेनकुलैपपुत्रेणामात्येन सुविशाखेन यथावदर्थधर्मव्यवहारदर्शनै-रनुरागमभिवर्द्धयंताशक्तेन दान्तेन। चपनेनाविस्मितेनार्येणस्वाधिष्ठिता धर्मकीर्ति यशांसि भुर्तुरभिवर्द्धयतानुष्ठितमिति।

**अथवा**

प्रदान-भुजविक्रम-प्रशम-शास्त्रवाक्योदयैः
रूपर्युपरि-सञ्चयोच्छ्रितमनेक-मार्गं यशः।
पुनाति भुवनत्रयं पशुपतेर्जटान्तर्गुहा
निरोध-परिमोक्ष-शीघ्रमिव पाण्डुगाङ्गपयः। 10

(आ) समुद्रगुप्तस्यप्रयागप्रशस्तेः ऐतिहासिक महत्त्वं प्रति पाद्यताम्।

**अथवा**

रुद्रदाम्नः अभिलेखस्य साहित्यिक वैशिष्ट्यंप्रतिपाद्यताम्। 10

□□□

https://universitynews.in/